याम्यादितूर्य्यतूर्य्यञ्च कृत्तिकादिद्विषट्ककम् ॥
एवं निरीक्ष्य वेधं कन्यामन्त्रे सुरे गुरौ ।
पण्यस्त्रीस्वामिमित्रेषु देशे ग्रामे पुरे गृहे ॥
एकनाडीस्थधिष्ण्यानि यदि स्युर्वरकन्ययोः ।
तदा वेधं विजानीयात् गुर्व्वादिषु तथैव च ॥
प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतो वधः ।
प्रनष्टं जन्मभं यस्य तस्य नामर्क्षतो वदेत् ॥
द्वयोर्जन्मभयोर्वेधो द्वयोर्नामभयोस्तथा ।
नामजन्मर्क्षयोर्वेधो न कर्त्तव्यं कदाचन ॥
एकनाडीस्थिता चेत् स्यात् भर्त्तुर्नाशाय चाङ्गना ।
तस्मान्नाडीवधो वीक्ष्यो विवाहे शुभमिच्छता ॥
प्राङ्नाड्या वेधतो भर्त्ता मध्यनाड्योभयं तथा ।
पृष्ठनाडीवधे कन्या म्रियते नात्र संशयः ॥
एकनाडीस्थिता यत्र गुरुर्मन्त्रश्च देवताः ।
तत्र द्वेषं रुजं मृत्युं क्रमेण फलमादिशेत् ॥
प्रभुः पण्याङ्गनामित्रं देशो ग्रामः पुरं गृहम् ।
एकनाडीगता भव्या अभव्या वेधवर्ज्जिताः ॥"
प्रतिप्रसवमाह ज्योतिषे ।
"एकराश्यादियोगे तु नाडीदोषो न विद्यते ॥"
स यथा ।
"एकराशौ च दम्पत्योः शुभं स्यात् समसप्तके ।
चतुर्थे दशमे चैव तृतीयैकादशे तथा ॥"
समग्रहणाद्विषमसप्तके दोषः । तथा च ।
"योटके सप्तके मेषतुले युग्महयौ तथा ।
सिंहघटौ सदा वर्ज्यौ मृतिं तत्राब्रवीच्छिवः ॥"
श्रीपतिव्यवहारनिर्णये ।
"सुहृदेकाधिपयोगे ताराबले वश्यराशौ वा ।
अपि नाड्यादिवेधे भवति विवाहो हितार्थाय ॥"
राजमार्त्तण्डे ।
"न राजयोगे ग्रहवैरिता च
न तारशुद्धिर्न गणत्रयं स्यात् ।
न नाड़िदोषो न च वर्णदुष्टि-
र्गर्गादयस्ते मुनयो वदन्ति ॥"*॥
राजयोगस्तु एकराश्यादियोग एव तत्रैव नाड्यादिप्रतिप्रसवात् ॥ श्रीपतिरत्नमालायाम् ।
"अश्वे भाजफणिद्वयञ्च वृषभुङ्मेषोन्दुरुस्तूपिक-
श्चाखुर्गौः क्रमशस्ततोऽपि महिषी व्याघ्रः पुनः सौरभी ।
व्याघ्रेणौ मृगकुक्कुरौ कपिरथोरभ्रद्वयं वानरः
सिंहोऽश्वो मृगराट् पशुश्च करटी योनिश्च भानामियम् ॥
गोव्याघ्रं गजसिंहमश्वमहिषं श्वैणञ्च बभ्रूरगं
वैरं वानरमेषकञ्च सुमहत्तद्विड़ालोन्दुरुम् ।
लोकानां व्यवहारतोऽन्यदपि च ज्ञात्वा प्रयत्नादिदं
दम्पत्योर्नृपभृत्ययोरपि सदा वर्ज्यः शुभस्थायिभिः ॥
मकरसमेतं मिथुनं कन्याकलसौ मृगेन्द्रमीनौ च ।
वृषभतुलेऽलिमेषौ कर्कटधनुषी च मित्रविधौ ॥"
षड़ष्टकाविति शेषः ॥ * ॥ अरिषड़ष्टकमाह ।
"मकरः करिकुलरिपुणा
कन्या मेषेण सह झषस्तुलया ।
कर्किघटौ वृषधनुषी
वृश्चिकमिथुने चारिविधौ ॥ * ॥
यदि कन्याष्टमे भर्त्ता भर्त्तुः षष्ठे च कन्यका ।
षड़ष्टकं विजानीयादर्ज्जितं त्रिदशैरपि ॥*॥
पुंसो गृहात् सुतगृहे सुतहा च कन्या
धर्म्मे स्थिता सुतवती पतिवल्लभा च ।
द्विद्वादशे धनगृहे धनहा च कन्या
रूप्फे स्थिता धनवती पतिवल्लभा च ॥"
षड़ष्टकादौ तारानियममाह भीमपराक्रमः ।
"सौहृद्ये शुभयोर्द्वयोरपि तयोरैकाधिपत्येऽपि वा
तारा षष्ठसुमित्रमित्रदहनक्षेमार्थसम्पद्यदि ।
षट्काष्टे नवपञ्चमे व्ययधने योगे च पुंयोषितोः
प्रीत्यायुःसुखवृद्धिपुष्टिजनकः कार्य्यो विवाहस्तदा ॥" * ॥
गर्गः ।
"मरणं ताराविरोधे ग्रहरिपुभावे चिरेण ।
रोगादि नरनार्य्योः षट्काष्टके वैरमवश्यं भवेदाशु ॥"*॥
व्यासः ।
"मैत्रादियोगेऽपि षड़ष्टकादौ
तारा विपत्प्रत्यरिनैधनाख्याः ।
वर्ज्या विवाहे पुरुषोडुतो हि
प्रीतिः परा जन्मसु तारकासु ॥
नक्षत्रमेकं यदि भिन्नराशि-
र्न दम्पती तत्र सुखं लभेताम् ।
विभिन्नमृक्षं यदि चैकराशि-
स्तदा विवाहः सुतसौख्यदायी ॥
एकर्क्षा च यदा कन्या राश्येका च यदा भवेत् ।
धनपुत्त्रवती नारी साध्वी भर्तृप्रिया सदा ॥
षड़ष्टके गोमिथुनं प्रदेयं
कांस्यं सरूप्यं नवपञ्चके तु ।
दिद्वादशाख्ये कनकान्नताम्रं
विप्रार्च्चनं हेम च नाड़ीदोषे ॥
मरणं नाड़ीदोषे कलहः षट्काष्टके विपत्तिर्वा ।
अनपत्यता त्रिकोणे दिद्वादशे च दारिद्र्यम् ॥"*॥
कृत्यचिन्तामणौ ।
"हस्तास्वातिश्रुतिमृगशिरःपुष्यमैत्राश्विभानि
पौष्णादित्ये जगुरिह बुधा देवसंज्ञानि भानि ।
पूर्व्वास्तिस्रः शिवभभरणीरोहिणी चोत्तराश्च
प्राहुर्मर्त्याह्वयमुडुगणं नूनमेतं मुनीन्द्राः ॥
चित्राश्लेषानिरृतिपितृभे वासवं वासवर्क्षं
शक्राग्न्योर्भे वरुणदहनर्क्षे च रक्षोगणोऽयम् ॥"
फलमाह श्रीपतिः ।
"स्वकुले चोत्तमा प्रीतिर्मध्यमा देवमानुषे ।
देवासुरे कनिष्ठा च मृत्युर्मानुषराक्षसे ॥
राक्षसी च यदा कन्या मानुषश्च वरो भवेत् ।
तदा मृत्युर्न दूरस्थो निर्धनत्वमथापि वा ॥"
राजमार्त्तण्डे ।
"यदि स्याद्राक्षसो भर्त्ता कन्यका मानुषी भवेत् ।
विवाहे सुखमाप्नोति वैपरीत्यं विवर्ज्जयेत् ॥"
युद्धजयार्णवे ।
"देवा जयन्ति युद्धेन सर्व्वथा नात्र संशयः ।
रक्षसां मानुषाणाञ्च संग्रामे निश्चया मृतिः ॥
कर्किमीनालयो विप्राः क्षत्त्राः सिंहतुलाहयाः ।
वैश्या युग्माजकुम्भाख्याः शूद्रा वृषमृगाङ्गनाः ॥
सर्व्वाः परिणयेद्विप्रः क्षत्त्रियो नवभाग्भवेत् ।
षड़ाश्रयो भवेद्वैश्यस्तिस्रः शूद्रे प्रकीर्त्तिताः ॥
वर्णश्रेष्ठा च या नारी हीनवर्णश्च यः पुमान् ।
महत्यपि कुले जाता नासौ भर्त्तरि रज्यते ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
अन्यत् उद्वाहशब्दे द्रष्टव्यम् ॥*॥*॥ तत्प्रयोग यथा । अथ कृतवृद्धिश्राद्धः संप्रदाता लग्नसमये संप्रदानशालायां गत्वा उत्तरतः क्षौमवर्णे बद्धा विष्टरादिकं सज्जीकृत्य पश्चिमाभिमुखोऽनुपविष्टस्तिष्ठेत् । ततोऽग्रत उपस्थिते वरे संप्रदाता कृताञ्जलिर्वरणं कुर्य्यात् । ॐ साधु भवानास्तामिति पृच्छेत् । जामाता ॐ साध्वहमासे इति वदेत् । संप्रदाता ॐ अर्च्चयिष्यामो भवन्तं इति पृच्छेत् । जामाता ॐ अर्च्चय इति वदेत् । ततः संप्रदाता पाद्यार्घ्याचमनीयगन्धमाल्ययथाशक्त्यङ्गुरीयसपट्टकयज्ञोपवीतसपर्णपूगादिकं प्रदाय जामातरमर्च्चयेत् । ततः संप्रदाता दक्षिणं जानु धृत्वा ॐ अद्येत्यादि अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः प्रपौत्त्रं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पौत्त्रं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पुत्त्रं अमुकगोत्रं अमुकप्रवरं अमुकदेवशर्म्माणं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः प्रपौत्त्रीं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पौत्त्रीं अमुकगोत्रस्यामुकप्रवरस्य अमुकदेवशर्म्मणः पुत्त्रीं अमुकगोत्रां अमुकप्रवरां श्रीअमुकीदेवीं एनां कन्यां शुभविवाहेन दातुं एभिः पाद्यादिभिः अभ्यर्च्य भवन्तमहं वृणे । जामाता ॐ वृतोऽस्मि इति वदेत् । संप्रदाता यथाविहितं विवाहकर्म्म कुरु । जामाता ॐ यथाज्ञानतः करवाणीति वदेत् । ततः स्त्र्याचारादिकं कारयित्वा सुखचन्द्रिकां कारयेत् । ततोऽग्रे उपस्थिते वरे संप्रदाता अमुं मन्त्रं जपति । प्रजापतिरृषिरनुष्टुप् छन्दोऽर्हणीया गौर्देवता गवोपस्थापने विनियोगः । ॐ अर्हणा पुत्त्रवाससा धेनुरभवद्यमे सा नः पयस्वती दुहा उत्तरा मुत्तरां समाम् । ततो जामाता प्रजापतिरृषिर्गायत्री छन्दो विराड्देवता उपविशदर्हणीयजपे विनियोगः । ॐ इदमहमिमां पद्यां विराजमन्नाद्यायाधितिष्ठामि । इमं मन्त्रं जपन्नासने प्राङ्मुख उपविशति । ततः संप्रदातापि पश्चिमाभिमुख उपविशेत् । ततो दाता साग्रपञ्चविंशतिकुशपत्रैः दिर्वामाधोमुखग्रन्थिं रचितं